# छत्रपति शिवाजीस्तुतिः

**(कविराजभूषणकृतस्य 'इंद्र जिमिजृंभपर'---इत्यादिकस्य शिवराजस्तवनस्य पद्यबद्धः भावानुवादः)**

---

इंद्रो यथा जृंभविनाशकर्ता
यथाम्बुराशेश्च हि वाडवाग्निः।
यथा दशास्यस्य च रामचंद्रः
शिवस्तथा म्लेच्छसमूहहन्ता॥१ ॥
शास्ताम्बुवाहस्य यथा समीरो
यथा शिवः कामकृतान्तकोऽभूत् ।
सहस्रबाहोश्च हि जामदग्निः
शिवस्तथा म्लेच्छसमूहहन्ता॥२ ॥
महीरुहाणां च यथा दवाग्निः
व्याघ्रो निहन्ता च यथा मृगाणाम् ।
वितुण्डभेत्ता च यथा मृगेन्द्रः
शिवस्तथा म्लेच्छसमूहहन्ता॥३ ॥
तेजोनिधिध्वांन्तपटस्य हर्ता
कृष्णो यथा कंसनिरासकर्ता ।
सर्वान् स पंचास्य इवातिशेते
शिवस्तथा म्लेच्छसमूहहन्ता॥४॥

*****

वैद्य श्रीनिवास पु. हिर्लेकर

(By: Vaidya Shriniwas P. Hirlekar)